[५२६] तच्चरतीति च[1] । (म. भा. २. ३६०)

महानाम्न्य[2] ऋचः, तत्सहचरितं व्रतं तच्छब्देनोच्यते । महानाम्नीश्चरति माहानामिकः । आदित्यव्रतिकः । गौदानिकः । भस्याढे (६. ३. ३५/८३६वा.) [3]इति पुंवद्भावेन [4]ङीपि निवृत्ते 'नस्तद्धिते' (६.१.१४४/६७९) इति [5]टिलोपः ।

[५२७] अवान्तरदीक्षादिभ्यो डिनिर्वक्तव्यः । (म. भा. २. ३६०)

अवान्तरदीक्षां चरति अवान्तरदीक्षी । तिलव्रती[6] ।

[५२८] अष्टाचत्वारिंशतो ड्वुंश्च डिनिश्च वक्तव्यः । (म. भा. २.३६०)

अष्टाचत्वारिंशद् वर्षाणि व्रतं चरति अष्टाचत्वारिंशकः, अष्टाचत्वारिंशी ।

[५२९] [7]चातुर्मास्यानां यलोपश्च ड्वुंश्च डिनिश्च [8]वक्तव्यः । (म.भा. २.३६०)

चातुर्मास्यानि चरति चातुर्मासकः, चातुर्मासी ।

[५३०] चतुर्मास्याण् ण्यो यज्ञे तत्र भवे । (म. भा. २.३६१)

चतुर्षु मासेषु भवानि चातुर्मास्यानि ।

[५३१] सञ्ज्ञायामण् वक्तव्यः । (म. भा. २. ३६१)

चतुर्षु मासेषु भवा चातुर्मासी पौर्णमासी । आषाढी । कार्तिकी । फाल्गुनी ॥

## तस्य च दक्षिणा यज्ञाख्येभ्यः । (९५/१७८९)

तस्य इति षष्ठीसमर्थेभ्यो यज्ञाख्येभ्यो[9] दक्षिणा इत्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति । अग्निष्टोमस्य दक्षिणा आग्निष्टोमिकी । वाजपेयिकी । [10]राजसूयिकी । आख्याग्रहणम् अकालादपि [11]यज्ञवाचिनो यथा स्यात् इति । इतरथा हि कालाधिकारा[12]देकाहद्वादशाहप्रभृतय एव यज्ञा गृह्येरन् । 'प्राग्वतेः सङ्ख्यापूर्वपदानां तदन्तग्रहणमलुकि' (७. ३. १७/१६८३ वा.) इति [13]कालाधिकारेऽपि [14]द्वादशाहादिष्वस्ति [15]प्राप्तिः ॥

---

1. महानाम्न्यादिभ्यः उपसंख्यानम् कर्तव्यम् इत्यधिकम् ड. 2. नाम इत्यधिकम् ड. 3. तद्धिते इत्यधिकम् ड. 4. ङीपि निवृत्ते नास्ति ड. 5. टिलोपः नास्ति ब, भवति इत्यधिकम् ड. 6. देवव्रती इत्यधिकम् ब. फ. ह. 7. चातुर्मास्यादीनां क. 8. प्रत्ययौ वक्तव्यौ क. 9. प्रातिपदिकेभ्यः इत्यधिकम् क. फ. 10. राजसूयिकी नास्ति ड. ह. 11. यत्तद्वाचिनः क. 12. एकदशाह° क, दशाह ड. 13. कालाधिकारात् क. ह. 14. एकदशाह- प्रभृतिषु क. 15. प्रसङ्गः ब. क. ड. ह.